# उपनिषत्सु चैतन्यम् ।

प्रो. शेषाचल शर्मा

जगति सर्वोऽपि जन्तुर्जायते म्रियते च । जन्ममरणमध्यपतितः सर्वोऽपि व्यापारः पशूनां मनुजानां च समान एव वरीवर्ति । अथापि मनुजेषु पश्वतिशायी कच्चिद् विशेषो वर्तत इति सर्वतत्त्वज्ञसंप्रतिपन्नोयंऽ विषयः । "ज्ञानं हि तेषामाधिको विशेषः" इति वचनात् पशुमतिरिच्य ज्ञानमात्रेण विराजते मनुजः । तादृशज्ञानरहितस्तु मनुजः सर्वथा पशुतुल्य एव विभाव्यते । तादृशज्ञानप्राप्तिमात्रेण मानवजन्म सार्थकं भवतीति निश्चप्रचम् । तादृशं च ज्ञानं किमिति किंचिद् विचारयामः ।

सर्वोऽपि मानवोऽहमित्यात्मानमात्मभिन्नं चेदमिति प्रत्येति । कदाचिदितरेतरभावाध्यारोपेणापि व्यवहरति । तत्राहमितिप्रतीयमानं तत्त्वं किमिति विषये तत्वान्वेषणधिषणानां नैकमत्यं दरीदृश्यते । तत्र पृथिव्यादिभूतचतुष्टयसंयोग-संजायमानचैतन्ययुक्तं शरीरमेवात्मानं मन्यन्ते लोकायतिकत्वेन प्रख्याताश्चार्वाकाः । तदन्तर्गता एव केचित् इन्द्रियमारभ्य मनः पर्यन्तं शेमुषीं प्रसार्य यथायोगं इन्द्रियादिकमेवात्मत्वेन सम्भावयन्ति । विचारपरम्परारोहणेन बहुदूरं गता अपि किंचिदपि तत्त्वमलभमानाः केचन बौद्धाभिमानिनः शून्यमेवात्मतत्त्वमिति संगिरन्ते। तदसहमानास्तदीया एव कतिचन सौगताः क्षणिक विज्ञानमेकमेव तत्त्वं मन्यमानाः आत्मतत्त्वं तद्रूपमेवामनन्ति। भोक्तैव केवलमात्मा न कर्तेति सांख्याः संलपन्ति । कर्तारं भोक्तारं चात्मानं प्रवदन्ति तार्किकरसिकाः । योगिनस्तार्किकाश्चात्मनं परमात्मानं चाङ्गीकुर्वन्ति । एवमेवान्येऽपि यथामतिविभवमात्मान - मामनन्ति । औपनिषदविचारस्तु आत्मतत्त्वविषये सर्वातिशायी शोभते। निरुपहितपरिशुद्धचैतन्य-मेवात्मेति उपनिषदामप्रतिहतः परमसिद्धान्तः ।

## उपनिषच्छब्दार्थः ।

उपनिषत्, वेदान्तः, वेदशिरः, आत्मविद्या, ब्रह्मविद्या, परा विद्या, आत्मज्ञानम्, ब्रह्मज्ञानम् - इत्यादयः शब्दाः वेदान्तदर्शने पर्यायत्वेन व्यवह्रियन्ते ।

कठोपनिषदभाष्यारम्भे शङ्करभगवत्पादः शब्दनिर्वचनपूर्वकमुपनिषच्छब्दस्यार्थमेवं निरूपयन्तिः - सदेर्धातोर्विशरणगत्यवसादनार्थस्यो-पनिपूर्वस्य क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति । उपनिषच्छब्देन च व्याचिख्यासित - ग्रन्थप्रतिपाद्यावस्तुविषया विद्योच्यते । ये मुमुक्षवो दृष्टानु - श्रविकविषयवितृष्णाः सन्तः उपनिषच्छब्दवाच्यां वक्ष्यमाण - लक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्धिंसनाद्विनाशाना - दित्यनेनार्थयोगेन विद्योपनिषदुच्यते ।

तथाच वक्ष्यति : - "निचाय्य तं मृत्युमुखात् प्रमुच्यते" - इति पूर्वोक्तविशेषणान् मुमुक्षून् वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगात् ब्रह्मविद्योपनिषत् । तथाच वक्ष्यतिः- "ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युः"-इति । लोकादिर्ब्रह्मजज्ञो योऽग्निस्तद्विषयाया विद्याया द्वितीयेन वरेण प्रार्थ्यमानायाः स्वर्गलोकफलप्राप्तिहेतुत्वेन गर्भवासजन्मजराद्युपद्रववृन्दस्य लोकान्तरे पौनःपुन्येन प्रवृत्तस्यावसादयितृत्वेन शैथिल्या - पादनेन धात्वर्थयोगात् अग्निविद्याप्युपनिषदुच्यते ।

तथाच वक्ष्यति : - "स्वर्गलोका अमृतत्वं भजन्ते" - इत्यादि । ननु चोपनिषच्छब्देनाध्येतारो ग्रन्थमप्यभिलपन्ति । उपनिषदमधीमहेऽध्यापयाम इतिच । एवं नैषदोषाऽविद्यादिसंसारहेतु विशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसंभवाद्विद्यायां च संभवात् । ग्रन्थस्यापि तादर्थ्येन तच्छब्दत्वोपयत्तेः । आयुर्घृतमित्यादिवत् । तस्माद् विद्यायां मुख्यया वृत्त्या उपनिषच्छब्दो वर्तते, ग्रन्थे तु भक्त्येति । एवमेवेतरोपनिषद्भाष्यारम्भेषु प्रायः उपनिषच्छब्दार्थं सम्यग् निरूपयन्ति भगवत्पादाः ।

श्रीविद्यारण्य स्वामिनोऽपि तैत्तिरीयोपनिषद्भाष्य - भूमिकायां प्रतिपादयन्तिः-

"अत्र ह्युपनिषच्छब्दोब्रह्मविद्यैकगोचरः ।

तच्छब्दावयवार्थस्य विद्यायामेव संभवात् ॥

उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते ।

सामीप्यात् तारतम्यस्य विश्रान्तेः स्वात्मनीक्षणात् ॥

त्रिविधः सदिधात्वर्थो विद्यायां संभविष्यति ।

श्रीमत्सुरेश्वराचार्यैर्विस्पष्ट मिदमीरितम् ॥"

"उपनीयेममात्मानं ब्रह्मापास्तद्वयं स्वतः ।

निहन्त्यविद्यां तज्जं च तस्मादुपनिषद् भवेत् ॥

निहत्यानर्थमूलां स्वाविद्यां प्रत्यक्तया परम् ।

गमयत्यस्तसंभेदमतो वोपनिषद् भवेत् ॥

प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः ।

यतोऽवसादयेद्विद्या तस्मादुपनिषन्मता ॥" इति ।

यथोक्तविद्याहेतुत्वाद्ग्रन्थोऽपि तदभेदतः ।

भवेदुपनिषन्नामा लाङ्गलं जीवनं यथा ॥ इति च ।

तथाचेदं निश्चितं यदुपनिषच्छब्दः मुख्यया वृत्त्या विद्यामभिधत्ते लक्षणया च ग्रन्थमपीति ।

## उपनिषत्प्रतियाद्यो विषयः

उपनिषत्प्रतियाद्यो मुख्यो विषयः क इतीदानीं चिन्तामर्हति । अनन्य लभ्यमेव विषयं समामनन्ति तीर्थकराः । अद्वैतमात्मतत्त्वमेवोपनिषदां प्राधान्येन प्रतिपाद्यो विषयः । यतो हि, वेदान्तव्यतिरिक्तेन केनाप्यन्येन प्रमाणेन अद्वितीयमात्म -तत्त्वमधिगन्तुं न शक्यते । "नावेदविन्मनुते तं बृहन्तम्" इति श्रुतिर्ब्रह्माधिगमे वेदातिरिक्तं प्रमाणमप्रमाणीकरोति ।

वाजसनेयी श्रुतिराघोषयति : -

"तं त्वौपनिषदं पुरूषं पृच्छामि" इति । औपनिषदोनामोपनिषत्स्वेवाधिगत इत्यर्थः। अद्वितीयमात्मतत्त्वं प्रत्यक्षप्रमाणगम्यं न भवति, "न संदृशे तिष्ठतिरूपमस्य न चक्षुषा पश्यति कश्चनैनम्," "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं

नित्यमगन्धवच्चयत्" इत्यादिश्रुतेः। नाप्यनुमानं तत्र प्रभवति, हेतुदृष्टान्तयोरनुपलब्धेः। अद्वैतात्मतत्त्वं च निर्धर्मकमिति न तत्र हेतुसंभावनास्ति। अद्वितीयत्वाच्च तस्य दृष्टान्तो न घटते । यद्यपि, "जन्माद्यस्य यतः" (ब्र.सू. १-१-१) इति सूत्रे कार्यत्वानुमानेन जगत्कर्तुर्ब्रह्मणः सिद्धिर्निरूपिता । "श्रोतव्यो मन्तव्यः" इत्यादिश्रुतिः ब्रह्मसिद्धौ तर्कमप्युपष्टम्भकत्वेनानुमनुते । तथापि, वेदान्तमात्रसमधिगम्यं ब्रह्म । किन्तु पुरूषमतिस्वस्थतायै अनुमानमप्यनुमन्यते। तादृशंचानुमानमारोपितं हेतुं दृष्टान्तं चोपजीव्य तत्र प्रवर्तते । न तावतानुमानेन ब्रह्मसिद्धिः सम्मता । अनुमानं हि सामान्याकारेण जगत्कर्तृत्वरूपेण ब्रह्म निरूपयति । किन्तु सत्यज्ञानानन्ता-द्वितीयाखण्डैकरसरूपेण वेदान्ततात्पर्य-विषयीभूतेन विशेषाकारेण नानुमानं ब्रह्माधिगमयति । अतो ब्रह्मसिद्धिर्नानु-मानाधीना ।

आगमोऽपि कर्मज्ञानकाण्डभेदेन द्विधा वरीवर्ति । भव्यं धर्मं बोधयन् कर्मकाण्डः नित्यसिद्धं ब्रह्माधिगमयितुं न प्रभवति । आगमस्य च ज्ञानकाण्डभागः उपनिषदिति व्यपदिश्यते । अतः सिद्धमेतत् यदुपनिषदामद्वैतात्मतत्त्वमेव प्राधान्येन प्रतिपाद्यो विषय इति। भगवद्बादरायणसूत्रमपि इममेवार्थं सम्यग् युक्त्या प्रतिपादयति । "शास्त्रयोनित्वात्" (ब्र.सू. १-१-३) इति सूत्रस्य द्वितीयवर्णके योनिशब्दस्य ज्ञप्तिकारणं प्रमाणमित्यर्थं स्वीकृत्य उपनिषद्रूपशास्त्रसमधि-गम्यत्वमद्वैतात्मतत्त्वस्य निर्णीतम् ।

**चैतन्य स्वरूपम् ।**

अद्वैतात्मतत्त्वं च निर्विशेषचैतन्यस्वरूपमिति उपनिषत्परमसिद्धान्तः । अशेषतः संसारबीजोपमर्दनाय निखिलक्लेशमूलस्य अज्ञानस्य आत्यन्तिकी निवृत्तिः सर्वविधोपाधिविलयेन स्वयं विराजमानात्मदर्शनेनैव सिद्ध्यतीति वेदान्तडिण्डिमः । याथार्थ्येनात्मविद्योदयेसति निखिलानर्थमूलाविद्या तुच्छत्वमेवापद्यते । सुरेश्वराचार्याः वार्तिके व्याजहुः "प्रत्यग् ब्रह्मणि विज्ञाते नासीदस्ति भविष्यति" इति। ननु निर्विशेषात्मदर्शनेन अविद्याया आत्यान्तिकी निवृत्तिः कथं संभवति ? अनादिः खल्वविद्या भवतीति वेदान्तिभिरूद्धोष्यत इति चेत्, न । विरोधिसंनिपातेन अनादिरपि

विनश्यत्येव । यथा अनादिरपि प्रागभावः कार्योत्पत्तौ विनिवर्तते तद्वत् । अथ कथ्येत - विद्योदये सति विनाशं प्राप्तायाः अविद्यायाः कीदृशी अवस्था भवतीति ?

असत्त्वावस्था इत्येव तत्रोत्तरम् । मुद्गरपातादिना विनष्टो घटः देशकालक्रिया संबन्धायोग्यः असत्त्वमेवापद्यते । तथैव विद्योदयात् पूर्वं चैतन्यरूपं देशं, ईश्वरादिरूपंकालं, संसार रूपं च कार्यं संबन्धित्वेन प्रकल्प्य विजृम्भमाण - मज्ञानं विद्योदये सति चैतन्यादिना संबन्धानर्हं सर्वथा असत्त्वमेवापद्यते । मुद्गरपातेन जायमानः घटध्वंसः नित्यो भवतीति कथ्यते चेत्, किमलीकविवादेन ? नहि घट एव घटध्वंसरूपाभावस्वरूपं प्राप्नोति । उत्पत्तेः पूर्वं नाशादूर्ध्वं च कार्यमसदेवेति काणादानां भणितिः । वेदान्तसिद्धान्तानुसारेण ध्वंसोऽपि उत्पत्तिवत् क्षणिको भावविकार एव, द्वयोरपि संसारावस्थायामेव प्रतीति-योग्यत्वात्। विद्यारूपेण तत्त्वदर्शनेन अविद्या सर्वथा तुच्छत्वमाप्नोति इति श्रुतिसंमतः सिद्धान्तः । अतो विद्यायाः प्रादुर्भावे अविद्यातत्कार्यविलयेन चैतन्यमात्र - मवशिष्यते । ईदृशीं चैतन्यमात्रावशेषतां "ब्रह्मविदाप्नोति परम्," "स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवति" इत्यादयः श्रुतयः प्रतिपादयन्ति ।

आत्मैव ब्रह्म । निर्विशेषचैतन्यमेव ब्रह्मस्वरूपमिति उपनिषदां परमं तात्पर्यम्। परन्तु "लक्षणप्रमाणाभ्यांवस्तुसिद्धिः" इतिन्यायेन जिज्ञास्यमानस्य ब्रह्मणः लक्षणं द्वेधा उपनिषत्सु प्रतिपाद्यते । लक्षणं च तटस्थलक्षणं स्वरूपलक्षणमिति द्विधा भवति । तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणमिति कथ्यते । ब्रह्मवल्ल्यां शुद्धचैतन्यरूपस्य ब्रह्मणः स्वरूपमभिहितम्: - "सत्यं ज्ञानमनन्तं ब्रह्म" इति । ब्रह्मणः स्वरूप-लक्षणनिरूपणाय श्रुतिवाक्यमिदं विराजते। तत्र ब्रह्मेति विशेष्यपदम् । सत्यादि पदत्रितयं विशेषणसमर्पकमिति वेदितव्यम् । इमानि त्रीण्यपि विशेषणानि लक्षणार्थ प्रधानान्येव भवन्ति । अत्र विशेषण - प्राधान्यं न विवक्षितं भवति । यतो हि, विशेषणं नाम केवलं सजातीयेभ्यो विशेष्यं व्यावर्तयति । लक्षणंतु सजातीयेभ्यः विजातीयेभ्यश्च व्यावर्तयति । सजातीय विजातीयस्वगतभेदशून्यं ब्रह्मात्र जिज्ञास्यत्वेन (ज्ञेयत्वेन) उपक्रान्तम् । अतः श्रुतिवाक्यमिदं लक्षणार्थमित्यवगन्तव्यम् । सत्यादि वाक्यं

समानाधिकरणत्वेन प्रतीयमानमपि न विशेषणविशेष्यसंसर्गपरं भवति । यथाहि, "सोऽयंदेवदत्तः" इति वाक्यं समानाधिकरणमपि देवदत्तस्वरूपैक्यपरं निश्चीयते, तद्वत्। "गुणानांच परार्थत्वात् असंबन्धः समत्वात् स्यात्" इतिन्यायेन सत्यादिशब्दाः न परस्परं संबद्ध्यन्ते । अतः सत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्मेति सिद्ध्यति । त्रिकालाबाध्यं सत्यं भवति । बाध्यं च विकारः अनृतमिति कथ्यते । "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतेः सदेव सत्यमित्यवधार्यते । अतः "सत्यं बह्म" इति वचनं सर्वविकारात् बह्म व्यावर्तयति ।

यद्यपि विकाररूपकार्यापेक्षया कारणं सत् भवति । अथापि मृद्वत् अचिद्रूपं भवेदिति शंकोदियात् । अतः अचिद्रूपता - व्यावृत्तये ज्ञानं ब्रह्मेति पठ्यते । ज्ञानम्, ज्ञप्तिः, अवबोधः, चैतन्यम् - इत्यादयः पर्यायाः । भावप्रत्ययान्तः ज्ञानशब्दः । चैतन्यमेव ब्रह्मस्वरूपमित्यर्थः। सत्यानन्तशब्दावपि भावप्रधानावेव। अत एव ज्ञानशब्दः ज्ञानकर्तृत्वं न प्रतिपादयति । ज्ञानकर्तृत्वे हि ब्रह्म विक्रियमाणमापद्येत । विक्रियमाणस्य च सत्यत्वमनन्तत्वं च कथं भवेत्? ज्ञानकर्तृ च ज्ञेयज्ञानाभ्यां नियमेन प्रविभक्तं कथमनन्तं भवेत् ?

"यत्र नान्यद्विजानाति सभूमा" इति श्रुतिः भूमस्वरूपं प्रतिपादयति । लौकिकं ज्ञानमन्तवद् भवतीति ब्रह्मणः अन्तवत्त्वमापपद्येत । अतः तद्व्यावृत्तये अनन्तमिति विशेषणं अनन्तत्वस्वरूपं बोधयति । सत्यादीनि च विशेषणानि अनृतादिधर्मव्यावृत्ति-पराण्यपि लक्षणार्थ - प्रधानान्येव भवन्ति । ब्रह्मशब्दोऽपि स्वार्थेनैवार्थवान् भवति । अनन्तशब्दः परिच्छेदाभावबोधनद्वारा ब्रह्मणः विशेषणम् । सत्यज्ञानशब्दौ तु स्वार्थमेव समर्पयन्तौ विशेषणभावं भजतः । ब्रह्मवल्ल्यामेव उत्तरत्र "तस्माद्वा एतस्मादात्मनः" इति पूर्वोक्तब्रह्मण्येव आत्मशब्दः प्रयुज्यते । अतः वेदितुरात्मा ब्रह्मैव। "तत् सृष्ट्वा तदेवानुप्राविशत्" "तत्त्वमसि", "अयमात्मा ब्रह्म", "अहंब्रह्मास्मि" इत्यादयः श्रुतयः जीवब्रह्मणोरभेदं बोधयन्तीति हेतोः अनन्तं ब्रह्म इति जीवसकाशादपि ब्रह्मणः परिच्छेदाभावः प्रतिपाद्यत इति अनन्तत्वं सर्वथा सुस्थितं भवति । अतः अखण्डानन्दरस - चिन्मात्रस्वरूपं ब्रह्मेति सर्वास्वपि उपनिषत्सु समन्वयेन सुनिश्चितोऽर्थः ।

**अखण्डाद्वितीयस्यैव चैतन्यस्य उपाधिकल्पनया नानारूपेण वर्णनम् ।**

शुद्धचैतन्यस्यैव ईश्वरभावसम्पत्तये मायारूपोपाधिः श्रुतिषुवर्ण्यमानः उपलभ्यते। "पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च", "मायांतु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" इत्यादयः श्रुतयः मायोपाधिकमीश्वरं समामनन्ति । "यतोवा इमानि भूतानि"- इत्यादिश्रुतिः ईश्वरस्यैव जगदुत्पत्तिस्थितिलयकारकत्वं प्रतिपादयति । अविद्योपाधिकत्वेन शुद्धचैतन्यमेव जीवभावमापद्य संसारित्वेन कर्मफलभोक्तृत्वेन च वर्ण्यते। "तयोरन्यः पिप्पलं स्वाद्वत्ति, अनश्नन् अन्योऽ - अभिचाकशीति" इत्यादिश्रुतिरत्रानुसन्धेया। जगज्जन्मादिकारणत्वं ब्रह्मणः तटस्थ लक्षणं भवति । स्वरूपात् भिन्नं सत्व्यावर्तकं लक्षणं तटस्थलक्षणमिति भण्यते । "सदेव सोम्येदमग्र आसीत्", "एकमेवाद्वितीयम्", ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा, तत्त्वमसि इतिश्रुतिः सर्वमखण्डाद्वितीयं ब्रह्मेति परमतात्पर्येण बोधयति। अथापि व्यवहारनिर्वाहाय सत्तात्रैविध्यमुपनिषत्स्वेव प्रक्रियाभेदेनोपवर्ण्यमानं दृश्यते। प्रक्रियादृष्ट्वैवच पारमार्थिकी व्यावहारिकी प्रातिभासिकी चेति त्रिविधा सत्ता उपनिषद्वाङ्मयपरिशीलनेन विभाव्यते । उपनिषदो हि सर्वलोकानुभवारूढं जाग्रत्स्वप्नसुषुप्तिरूपमवस्थात्रयमुपवर्ण्य तद्दृष्ट्या चतुर्थीं तुरीयावस्थां वर्णयित्वा "शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते, स आत्मा, स विज्ञेयः" इति तुरीयावस्थायां स्वरूपेण प्रकाशमानं शुद्धचैतन्यमेव परमार्थ इति उपायसोपानपंक्तिं प्रकल्प्य कल्पितसर्वप्रविलापेन परमार्थपदं प्रापयन्ति । क्वचिच्च नानारूपेण उपासनीयं ब्रह्मापि नानोपाधिद्वारा प्रतिपादयन्ति । उपाधिपरिकल्पनयैव जीवो नियम्यः, ईश्वरस्तु नियन्तेति च समुपवर्णयन्ति । उपनिषदां परमतात्पर्यपरिज्ञानेतु तत्र तत्र आपाततः प्रतीयमानो विरोधः स्वयमेव प्रविलीयते । अतश्च, परमतात्पर्यनिर्णयाय उपक्रमादीनि षड्विधानि तात्पर्यलिङ्गानि संपरिगृह्यन्ते : -

"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ।।" इति ।

समस्तास्वपि उपनिषत्सु वाक्यानि अखण्डाद्वितीयचैतन्यरूपं ब्रह्मैव परमतात्पर्येण प्रतिपादयन्तीति वेदितव्यानि ।

"सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्" (छां.६.२.१),

"आत्मा वा इदमेक एवाग्र आसीत् "(ऐत. २.१.१.१),

"तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्, अयमात्मा ब्रह्म सर्वानुभूः" (बृ.उ.२-५-१९); ब्रह्मैवेदममृतं पुरस्तात् (मुं. २-२-११) इत्यादीनि उपनिषद्वाक्यानि अत्र समनुसन्धेयानि । उदाहरणार्थं समन्वयप्रक्रिया एकत्र प्रदर्श्यते : -

छान्दोग्योपनिषदि श्रूयते "सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्" (६-३-१) इति । तत्र हि विद्यास्तुतते निबद्धा आख्यायिका भवति । महर्षिरूद्दालकः पुत्रं श्वेतकेतुं प्रोवाच : - "हे सोम्य प्रियदर्शन ! इदं सर्वं जगत् अग्रे उत्पत्तेः पूर्वं सत् त्रिकालाबाधितं परमार्थभूतं ब्रह्मैवासीत् । एवकारेण प्रपंचस्य पृथक्सत्ता प्रतिषिध्यते । "एकमेवाद्वितीयम्" इति त्रीणि पदानि प्रयुक्तानि । तेनच पदत्रयेण सजातीयविजातीयस्वगतभेदत्रितयं निराक्रियते। इत्थमद्वितीयं ब्रह्म उपक्रमेण निर्दिष्टम् । "ऐतदात्म्यमिदं सर्वम्" इति चोपसंहारः कृतः । उपक्रमोपसंहारयोः संभूयैकरूप्येण तात्पर्यलिङ्गमेकमिति वेदितव्यम् । तत्रैवोपनिषदि "तत्त्वमसि" इति नवकृत्वः उपदेशात् अभ्यासरूपं तात्पर्यलिङ्गं सिद्ध्यति । अपूर्वत्वं नाम मानान्तराप्रतिपाद्यत्वम् । रूपादि विहीनस्य अद्वितीयब्रह्मणः अपूर्वत्वमुपदिष्टम् : - "अत्र वाव किल तत् सोम्य न निभालयसे" इति । तेजोऽबन्नादिकार्यसंघाते स्वयंप्रकाशमानं प्रत्यग्ब्रह्म न जानासीत्यर्थः । "तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ संपत्स्ये" इति विदुषः ब्रह्मज्ञानात् ब्रह्मभावसम्पत्तिफलमभिहितम् । यावत्कालं देहविमोक्षो न भविष्यति तावदेव देहपातपर्यन्तः विलम्बो भवति । देहपातानन्तरमेव विद्वान् ब्रह्मैव संपत्स्यते । पूर्वमपि मुक्तस्यैव देहोपधिकृतो विलम्ब इव भवति । ब्रह्मविद् ब्रह्मैव भवतीत्यर्थः। उपचरितं फलत्वमिति वेदितव्यम् । अविद्यानिवृत्तिदृष्ट्या फलत्वोपचारः । विद्यास्तुतये खलु अर्थवादो निबद्ध्यते । "अनेन जीवेनात्मनानुप्रविश्य" इत्यादिः अद्वितीयज्ञानसम्पत्तये अर्थवादः। प्रकृतिं परित्यज्य विकारो न भवतीति मृदादिदृष्टान्तैः उपपत्तिरभिहिता भवति। एवमेव षट्प्रकाराणि तात्पर्यलिङ्गानि समस्तानि वा व्यस्तानि वा प्रतिवेदान्तमवगन्तव्यानि दरीदृश्यन्ते।

## ब्रह्मचैतन्यस्य वर्णनावैविध्यम् ।

उपनिषत्सु परमतात्पर्यविषयीभूतं तत्त्वं तु ब्रह्मचैतन्यमेकमेव । अथापि वर्णनादृष्ट्या तत्त्ववर्णने प्राधान्येन द्वयी गतिर्दृश्यते । कुत्रचित् स्थलेषु विधिमुखेन ब्रह्मणो वर्णनं दृश्यते । क्वचिच्च निषेधमुखेन । पाश्चात्यतत्त्वविचारपरेषु प्लोटैनस्नामा महाशयः मनोवागतीतं परं तत्त्वं निषेधमुखेनैव वर्णयितव्यं भवति नतु विधिमुखेनेत्यभिप्रैति । तदीयंहि वचनं वरीवर्ति : - "We say what he is not, we cannot say what he is." इति यत्साक्षादपरोक्षाद् ब्रह्म इति उपनिषद्वाणी अपरोक्षसाक्षात्काररूपं ब्रह्मानुभवं प्रतिपादयति । उपनिषत्सु ब्रह्मचैतन्यानुभववर्णनासौभाग्येन नितरां समाकृष्टाः बहवः तत्त्वविचारधुरीणाः उपनिषद्वचना-नामनितरसौभाग्यप्रकर्षं प्रमोदभरेण समुद्घोषयन्ति । महातत्त्वज्ञानीति प्रख्यातः डा. सर्वपल्ली राधाकृष्णमहोदयः स्वकीयग्रन्थभूमिकायां हर्षादरभरपूरितं वचो निस्सारयतिः-

"Anyone who reads the Upanishads in the original Sanskrit will be caught up and carried away by the elevation, the poetry, the compelling fascination of the many utterances through which they lay bare the secret and sacred relations of the human soul and the ultimate reality." इति ।

## उपनिषदां संख्या तत्त्वप्रतिपादनशैली च ।

ग्रन्थरूपेणोपनिषदः शताधिकाः समुपलभ्यन्ते । तत्र पञ्चदश वा षोडश वा उपनिषदः परिशुद्धब्रह्म - चैतन्यप्रतिपादनदृष्ट्या प्राधान्येन परिगण्यन्ते । शङ्कराचार्यप्रभृति-भिराचार्यैर्व्याख्याताश्च दशैकादशवोपनिषदः प्रख्याता भवन्ति।

विवेकसंपन्नं मानवं श्रेयोमार्गे नेतुं श्रेयः - प्रेयोमार्गद्वय प्रदर्शनपूर्वकं श्रेयोमार्गस्य गरमाणं वर्णयति कठोपनिषत् : -

"श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयोमन्दो योगक्षेमाद्वृणीते ॥" (कठ. २-२) इति । तत्रैव, "नेहनानास्ति किंचन -- मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" (४-११) इति भेददर्शननिन्दां करोति । सर्वव्यापकस्यापि ब्रह्मणः आत्माभेदेन दर्शनानुभवं वर्णयतिः -

"अङ्गुष्ठमात्रः पुरूषो मध्य आत्मनि तिष्ठति ।
ईशानं भूतभव्यस्य न ततो विजुगप्सते । एतद्वैतत् ॥" (४-१२) इति ।

परिपूर्णब्रह्मचैतन्याभेदेन आत्मदर्शिनः परमशान्तिं निर्दिशतिः -

"एको वशी सर्वभूतान्तरात्मा एकं रुपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥
नित्यो नित्यानां चेतनश्चेतनानामेकोबहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिःशाश्वती नेतरेषाम् ॥" (५-१२, १३) इति ।

माण्डूक्योपनिषत् अखण्ड़ाद्वयचैतन्यानुभवं सर्वाकार रमणीयं वर्णयति : -

"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृश्यमव्यवहार्यमग्राह्यम-लक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥" (मांडू. ७) इति । हृदयपुण्डरीके अध्यात्मयोगेन परमात्मसाक्षात्करे सति ब्रह्मचैतन्यामृतधाराप्रवाहरूपेण मुण्डकोपनिषद्वाणी निस्सरति : - "यः सर्वज्ञः सर्वविद् यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः ॥ मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद् विभाति ॥" (मुंड. २-२-६-७) इति ।

## उपनिषत्सु परमतात्पर्यदृष्टिः ।

प्रसिद्धासु दशस्वपि उपनिषत्सु एकमेवाखण्डमद्वितीयं ब्रह्मचैतन्यं परमतात्पर्येण प्रतिपाद्यते । तथा हि : -

ईशावास्योपनिषदि ईशावास्यमिदँ सर्वं यत् किं च जगत्यां जगत् ।
इति सर्वव्यापकं ब्रह्मचैतन्यमुपक्षिप्तम् ।

"तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ।" इति तस्यैव विशदीकरणं भवति ।
"यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥" इति सर्वात्मभावं तत्फलं च वर्णयति।

केनोपनिषदि : - "श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुः । अतिमुच्य धीराः प्रेत्या - स्माल्लोकादमृता भवन्ति ॥" इति सर्वप्रत्ययसाक्षिभूतं परब्रह्मचैतन्यं प्राधान्येन प्रतिपाद्यते ।

कठोपनिषदि : -

"अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद ॥" इति नचिकेतसा पृष्टो ब्रह्मिष्ठो वैवस्वतः ओंकारतत्त्वप्रतिपादनद्वारा "अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्चयत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥" इति निर्गुण-ब्रह्मचैतन्यस्व-रूपमुपदिशति ।

"यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम ॥" इत्यभेददर्शनफलं निरूपयति ।

प्रश्नोपनिषदि : - षोडशकलपुरूषवर्णनद्वारा निर्गुणब्रह्मज्ञानफलं निर्दिश्य, "एतावदेवाहमेतत्परं बह्म वेद नातःपरमस्तीति ।" इति बह्मचैतन्यातिरिक्तं वेदितव्यं किंचिदपि नास्तीति जोघुष्यते ।

मण्डकोपनिषदि : - परापरविद्याविभागपूर्वकं परया विद्यया समधिगम्यं परमं ब्रह्म निर्दिश्यते : -

"अथ परा यया तदक्षरमधिगम्यते । यत्तदद्रेश्यमग्राह्य - मगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥"

इति ।

"तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद् विभाति ॥" इति च। तत्रैव, ब्रह्मातिरिक्तविकारजातं सर्वं निराकृत्य निष्प्रतियोगिक - ब्रह्मचैतन्यमात्रावस्थानं वर्ण्यते :

"ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद् बह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥" इति ।

माण्डूक्योपनिषदि : - "सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म" इति नित्यापरोक्षब्रह्मभावमात्रा-वस्थानमखण्डैकरसं सर्वोपनिषत्सारभूतं संकीर्त्यते ।

ऐतरेयोपनिषदि : - "कोऽयमात्मेति वयमुपास्महे । कतरः स आत्मा" इति आत्मजिज्ञासां प्रस्तुत्य "प्रज्ञानं ब्रह्म" इति प्रत्यगब्रह्मैक्यं परमार्थ इति प्रतिपाद्यते।

तैत्तिरीयोपनिषदि : - "बह्मविदाप्नोति परम्" इत्युपक्रम्य "रसो वै सः" इति परमानन्दरूपं परमं ब्रह्म निर्वर्ण्य सर्वाकाराभयरूपो ब्रह्मभावः, "अथ सोऽभयं गतो भवति", "न बिभेतिकदाचनेति", "न बिभेति कुतश्चनेति" इत्यादिरीत्या सम्यग् वर्णितः ।

छान्दोग्योपनिषदि : - चित्तशुद्धये सम्पाद्यमानाः अनेक विधाः उपासनाः प्रतिपाद्य प्राधान्येन "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति प्रतिज्ञाय "ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा, तत्त्वमसि" इति नवकृत्वः उपदेशकरणेन उपसंहृत्य प्रत्यगब्रह्मैक्यमात्रं परमार्थ इति सुस्पष्ट प्रतिपादितम् ।

बृहदारण्यकोपनिषदि: - जनकयाज्ञवल्क्यसंवादादिरूपेण ब्रह्मतत्त्वं नाना-विधाभिर्युक्तिभिः प्राधान्येन प्रतिपाद्यते । याज्ञवल्क्यमैत्रेयीसंवादरूपेण आत्मविज्ञानेन सर्व विज्ञान सिद्धिपूर्वकं ब्रह्मात्मैक्यपारम्यं परमाद्भुतविधानेन निरूपितम् । निष्प्रतियोगिकब्रह्मात्मभावावस्थानसिद्धये मुमुक्षुभिर्निरन्तरमनुसन्धेयं "अहंब्रह्मास्मि" इति महामन्त्ररूपं महावाक्यं बृहदारण्यकोपनिषदि सिंहगर्जं गर्जति।

एवमुपनिषदः तत्त्वजिज्ञासून् परमार्थपदे नेतुं सर्वाकारेण समाकर्षन्तीति श्रुतिशिरोगिरां गरिमा संगीर्यतेतराम् ।

## महावाक्यार्थविचारः ।

उपनिषदां भगवद्गीतायाः ब्रह्मसूत्राणां च परमतात्पर्यं स्वयंप्रकाशमान-परमचैतन्यरूपं ब्रह्मात्मैक्यमिति श्री गौडपादशङ्करभगवत्पादप्रभृत्याचार्येभ्यः पुर्वं बहोःकालादारभ्य वेदान्तसंप्रदायारूढो विषय इति विदित एव । ब्रह्मात्मैक्य-सिद्धिरेव परमपुरूषार्थे मोक्षः । सच्चिदानन्दरूपब्रह्मात्मभावप्राप्त्यैव सकलशोकनिवृत्तिः । अपरोक्षानुभवरूपेण ब्रह्मात्मभावं बोधयन्ति उपनिषद्वाक्यानि महावाक्यानीति संप्रदायविदः समामनन्ति । आकारमहत्त्वं विभाव्य नैतानि वाक्यानि महावाक्यानीति व्यपदिश्यन्ते । निरूपाधिकमद्वितीयं ब्रह्मात्मभावं साक्षादनुभवपर्यवसायित्वेन बोधयन्तीति हेतोः वाक्यानामेषां महत्त्वं विद्योतते ।

"प्रज्ञानं ब्रह्म" (ऐत.२-३), "अहं ब्रह्मास्मि" (बृ.आ. उ. १-४-१०), "तत्त्वमसि" (छां.६), "अयमात्मा ब्रह्म" (मांड्.२) - प्रभृतीनि उपनिषद्वाक्यानि महावाक्यानि इति परिगणितानि। आधुनिकैः महावाक्यव्यपदेशः कल्पित इति वादः न स्थाने । यतः, महावाक्यविचारो हि वेदान्तसंप्रदायविदां परंपरया समारुढो विराजते। महावाक्यविवरण-महावाक्यविवेकप्रभृतयो ग्रन्थाः समुपलभ्यन्ते । ब्रह्मसूत्रभाष्ये शंकरभगवत्पादैरेव तत्त्वमासि-वाक्यस्य अर्थः अत्यन्तवैशद्येन निरूपित इति सर्वविदितोऽयं विषयः । शिवपुराणस्य कैलाससंहितायां संन्यासविधिनिरूपणप्रकरणे अथ महावाक्यानि - इति प्रस्तुत्य प्रज्ञानं ब्रह्म - इत्यादीनि द्वाविंशतिर्महावाक्यानि निर्दिष्टानि समुपलभ्यन्ते । शिवपुराणस्य, प्राचीनतायां नास्ति संशीतिलेशोऽपि ।

अद्याप्यद्वैतसंप्रदाये संन्यासदीक्षाप्रदानसंदर्भे गुरूः शिष्यं प्रणवार्थमवबोद्ध्य चतुर्णां महावाक्यानामर्थविवृतिपूर्वकमुपदेशं करोतीति संन्यास विधिसंप्रदायो वरीवर्ति। चतुर्भ्यो वेदेभ्यः संगृहीतानि इमानि महावाक्यानि सकलवेदपरमतात्पर्यं बोधयन्तीति परमार्थः। इतरास्वप्युपनिषत्सु महावाक्यानीमानि सन्दृश्यन्ते। सर्वासामप्युपनिषदां परमं तात्पर्यं तु अद्वितीयाखण्डनन्दपरम-चैतन्यरूपब्रह्मात्मैक्यमेव । साक्षादिममर्थं बोधयन्ति वाक्यानि महावाक्यानि मन्यन्ते। तदुपष्टम्भकत्वेन दृश्यमानानि चावान्तरवाक्यानीति परिगण्यन्ते । वेदान्तस्य संपूर्णं तत्त्वज्ञानं निर्दिष्टेषु चतुर्ष्वेतेषु महावाक्येष्वन्तर्निहितं विराजते ।

ब्रह्मज्ञानाभिलाषिणं शिष्यं प्रति ब्रह्मनिष्ठः सद्गुरूः प्रथममुपदिशति "प्रज्ञानं ब्रह्म" इति। लक्षणवाक्यत्वेन परिगणितमिदं वाक्यं शिष्यस्य चित्ते ब्रह्मस्वरूपमुद्बोध्य जोगुञ्जीति। अनन्तरं ब्रह्मात्मैक्य प्रबोधाय महागुरूरूपदिशति "तत्त्वमसि" इति । उपदेशवाक्यमिदं शिष्यान्तरङ्गेऽमृतधारावत्प्रवहति । तदनन्तरं "अयमात्माब्रह्म" इत्युपदिश्यमानं महावाक्यं शिष्ये बह्मानुभवं जागरयति । अतश्चेदमनुभववाक्यमिति व्यपदिश्यते । एवं शिष्यमध्यात्म भूमावारोप्य निरूपाधिकब्रह्मचैतन्यानुसन्धानाय सद्गुरूः स्वीयं पूर्णानुभवमेव गम्भीरघोषेण "अहं ब्रह्मास्मि" इति महावाक्यरूपेणोपदिशति । अनुसन्धानवाक्यत्वेन परिगणितमिदमुपदेशवाक्यं शिष्यहृदये प्रविष्टं निरन्तरं गुञ्जत् प्रतिष्ठितं भवति । आप्रायणाद् यतिनानुसन्धीयमानो महामन्त्रोऽयं देहपाते यतिं परिपूर्णब्रह्मचैतन्यात्मनावस्थापयति । अत एव विद्यारण्यस्वामिभिरभिहितम् : - "अनुभूतेरभावेऽपि ब्रह्मास्मीति विचिन्त्यताम् । अप्यसत् प्राप्यते ध्यानान्नित्याप्तं ब्रह्म किंपुनः ॥ इति । तेजोबिन्दूपनिषदि" अहं ब्रह्मास्मि इति महामन्त्रस्य परिपूर्णमहिमा वैशद्येन वर्णितो विराजते । अर्थानुभवपूर्वकमनुसन्धीयमानो महावाक्यमन्त्रोयं यतिं कृतकृत्यं करोति । "स यो हवै तत् परमंब्रह्मवेद बह्मैव भवति" इति मुंण्डकोपनिषद्घोषानुसारेण ब्रह्मविद् ब्रह्मण्येव प्रतिष्ठितो भवति । सर्वाण्यपि महावाक्यानि अखण्डार्थं बोधयन्तीति तत्वार्थविदां सिद्धान्तः समस्ति। पदार्थज्ञानेन खलु वाक्यार्थज्ञानं संपद्यते। पदार्थशोधनं कृत्वा अखण्ड-वाक्यार्थानुसन्धानं कर्तव्यम् ।

"प्रज्ञानं ब्रह्म" इति महावाक्यस्येदानीं परमार्थप्रकाशनरीतिर्निरूप्यते । ऐतरेयोपनिषदिश्रूयते : - आत्मा वा इदमेक एवाग्र आसीत् इति । त्रिष्वपि कालेषु आत्मैव स्वयंप्रकाशते इति वाक्यतात्पर्यम् । अध्यारोपापवादन्यायेन निष्प्रपंचं तत्त्वं प्रतिपादयितुमुत्तरत्रोपनिषत् लोकसृष्ट्यर्थं परमात्मनः ईक्षणादिकं वर्णयति । एवं विचारं प्रस्तुत्य कोऽयमात्मेति वयमुपास्महे । कतरः स आत्मा इति आत्मतत्त्वजिज्ञासामुद्भावयति। उपनिषदि च ईक्षणमारभ्य प्रवेशपर्यन्तं वर्ण्यमानाख्यायिका केवलमर्थवाद इति वेदितव्यम् । समस्तः संसारः आत्मनः संकल्पेन आत्मस्वरूपमेवेति बोधयितुमियमाख्यायिका प्रक्रान्ता। इन्द्रियद्वारा संपद्यमानानि

दर्शनादीनि ज्ञानानि, हृदयं, मनः, संज्ञानम् - इत्यादयः सर्वा अपि मनोवृत्तयः प्रत्यक्चैतन्यस्य स्फुरणमात्रमितिहेतोः प्रत्यक्चैतन्यस्य प्रज्ञानस्यैव केवलं नानावधिानि नामानि भवन्ति । सर्वविधोपाधिरहितं प्रकृष्टं चैतन्यमेव हिरण्यगर्भः, इन्द्रः - इत्यादिसमस्तजीवजन्तुरूपेण, प्रकाशते । अतः सर्वोऽपि संसारः प्रज्ञानेन प्रकाशितः प्रज्ञानेनैव स्थितिं लब्ध्वा प्रज्ञाने एव प्रलीयैकीभवति। आत्मैव ब्रह्मेति श्रुतयः संगिरन्ते। अतोहि प्रज्ञानमेव परंब्रह्म । उपनिषद्भिः प्रतिपाद्यमानः सर्वात्मभावोऽयमेव । अत्र प्रज्ञानशब्देन प्रत्यगात्मनः निर्विशेषत्वं सिद्ध्यति । प्रज्ञानं प्रकृष्टचैतन्यमित्यर्थः । सर्वं प्रज्ञानमितिहेतोः तदेव परमार्थसत्यम् । ब्रह्मशब्देन च उपनिषत्सु शारीरकमीमांसाभाष्यादिषु च प्रतिपादितं सकलोपाधिवर्जितं निर्विशेषमद्वितीयं परमात्मचैतन्यं प्रतिपाद्यते । सामानाधिकरण्यमहिम्ना उपनिषद्वाक्येऽस्मिन् निर्विशेषं शुद्धचैतन्यमे-वाखण्डवाक्यार्थरूपेण विराजते । प्रत्यगात्मचैतन्यं जगत्कारण-त्वोपलक्षितं ब्रह्मचैतन्यं च निर्विशेषचिद्रूपमितिहेतोः ऐक्यमेवाखण्डवाक्यार्थरूपेण प्रकाशते। अध्यारोपापवादन्यायेन आत्मैव अविद्याया संसारीव भासमानः आत्मबोधेन स्वयं मुक्तात्माद्वितीयोऽवतिष्ठते । इदमेवोपनिषदः परमं तात्पर्यम् ।

प्रकारान्तरेणापि अत्र जीवब्रह्मणोरैक्यं प्रतिपादितं भवति । तथाहि : - प्रज्ञानशब्देन प्रत्यगात्मा बोध्यते । ब्रह्मशब्देन च जगत्कारणत्वोपलक्षितं ब्रह्मचैतन्यं प्रतिपाद्यते । सामानाधिकरण्यमहिम्ना प्रत्यग्ब्रह्मणोः निर्विशेषचिद्रूपत्वं लक्षणावृत्त्या प्रतिपाद्यते । "सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति" इति वाक्येन देहेन्द्रियादीनां साक्षिरूपं त्वंपदार्थभूतं प्रज्ञानं निश्चीयते । "एष ब्रह्म ।" - इत्यादिवाक्येन जगत्कारणत्वेन रूपेण निश्चितं ब्रह्मैव प्रतिपाद्यते। ततश्च प्रत्यग्ब्रह्मणोर्भेदलेशोऽपि नास्तीति निश्चीयते । अहमितिप्रतीतौ भासमानं चेतन्यं जीव इति व्यपदिश्यते । उपनिषत्प्रतिपादितरूपेण अनुभवगम्यंतु ब्रह्मैव विद्योतते । व्यवहारे भेदभासेऽपि तात्त्विको भेदो नैवभासते। प्रज्ञानब्रह्मशब्दयोः एक एवार्थे गृह्यते चेत् नर्हि पुनरूक्तिः खलु ? इत्याक्षेपो न स्थानं लभते। प्रत्यक्चैतन्यं ब्रह्मचैतन्यात् न भिन्नम्, ब्रह्मचैतन्यं च न परोक्षमिति प्रतिपादनाय पदद्वयं प्रयक्तं वर्तते। ब्रह्मपदप्रयोगवशात् श्रुतिप्रपिपादितं ब्रह्म न परोक्षमित्येव सिद्यति । एवमखण्डचैतन्यैकरसं ब्रह्म उपनिषदः परमतात्पर्यमिति

निश्चितं भवति।

"अहंब्रह्मास्मि" इति महावाक्येऽपि अखण्डार्थप्रक्रिया निरूप्यते । इदं चानुसन्धानवाक्यमिति पूर्वमेवाक्तम् । मोक्षापेक्षिभिः सततमिदमनुसन्धेयम् । विनाप्यर्थज्ञानं श्रुद्धया सततजपमात्रेण ब्रह्मानुभवसिद्ध्युपायभूतचित्तशुद्धि-सम्पादको भवत्ययं महामन्त्र इति सम्प्रदायविदः आमनन्ति । गुरूमुखेनैव महावाक्यमंत्रोपदेशः प्राप्तव्यः । अहमितिशब्देन अहङ्कारे प्रतिविम्बितं चैतन्यं प्रतिपाद्यते । बह्मशब्देन जगत्कारणत्वेन श्रुतिप्रसिद्धं ब्रह्मचैतन्यंबोध्यते । अस्मीतिपदेन तयोरैक्यं प्रतीयते । शुद्धयोः तात्त्विकभेदाभावात् स्वतः-सिद्धमैक्यमखण्डवाक्यार्थत्वेन विराजते । पुनरूक्तिदोषस्तु पूर्ववदेव परिहार्यः।

ब्रह्मज्ञानिना सद्गुरुणा यथार्थं ब्रह्मात्मैक्यमनुभवगम्यत्वेन प्रदर्शितं चेदेव मुमुक्षुस्तत्स्वरूपं प्रतिपद्यते । तावत्पर्यन्तं देहेन्द्रियादिषु अहंममाभिमानेन निरन्तरं क्लेशमनुभवन् परितपति जीवः। दृश्यं जगदेव सत्यत्वेन भावयति। तद्दृष्ट्यैवनाना-विधा वादाः प्रवर्तन्ते । सर्वाण्यपि मतानि स्वयंप्रकाशमानेन ब्रह्मणैव भासितानि भवन्ति। तदेव ब्रह्म अहमिति विद्योतते चेत् अहङ्कारः सर्वाकारेण दग्धो भवति । तृणभासकोऽपि भास्करकिरणः सूर्यकान्तमणिसमारुढः तृणं समूलं दहतीति लोके दृश्यते । तद्दृष्टान्तेन ब्रह्मज्योतिषा अहङ्कारदाहोऽपि समूलः संभवति । तथाच सुरेश्वराचार्यैरूक्त म् : -

"तृणादेर्भासिकाप्येषा सूर्यकान्तिस्तृणं दहेत् ।
सूर्यकान्तमुपारूह्य तंन्यायं तत्र योजयेत् ।।" इति।

छांदोग्ये उद्दालकेन पुत्रं श्वेतकेतुं प्रत्युपदेशप्रसङ्गे "तत्त्वमसि" इति महावाक्यमुपदिष्टं श्रूयते । इदंच महावाक्यमद्वैतसिद्धान्ते महत्त्वमतीवावहति । "सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्" इत्युपक्रम्य "ऐतदात्म्यमिदं सर्वम्" इत्युपसंहारेण षड्भिरपि तात्पर्यलिङ्गैः निश्चितं निरूपाधिकशुद्धब्रह्मचैतन्यमेवात्र वाक्ये अनुभवगम्यत्वेनोपदिश्यते । अत्रापि अखण्डवाक्यार्थ एव निश्चीयते । ततूपदेन जगत्कारणत्वोपलक्षितं श्रुतिप्रतिपादितं बह्माभिधीयते । त्वम्पदेन च देहादिसंधातसाक्षि जीवचैतन्यं प्रतिपाद्यते । असिपदेन तयोरैक्यं विवक्षितं भवति।

विरूद्धधर्मयोरैक्यायोगात् अत्र विरोधपरिहाराय सामानाधिकरण्यमहिम्ना उभयत्र लक्षणया शुद्धं चैतन्यमेव प्रतिपाद्यते । शुद्धयोरैक्यं संजाघटीति । असिपदेन च तदेव प्रतिपिपादयिषितम् पुनरूक्तिदोषः पूर्ववदेव परिहर्तव्यो भवति । "सआत्मा, तत्त्वमसि" इति अव्यवहितपूर्वं पठितः आत्मशब्दोऽपि प्रत्यग्ब्रह्मणोरैक्यनिर्णयेऽनुकूलतामावहति । तथाच अखण्डार्थत्वेन निरूपाधिकं परिपूर्णं शुद्धं ब्रह्मचैतन्यमेव श्रुतेः परमतात्पर्यमिति निश्चीयते ।

"अयमात्मा ब्रह्म" इति महावाक्येऽपि अखण्डार्थप्रक्रिया निरूप्यते । ब्रह्मविद्या हि परममुरूषार्थसाधनमिति वेदान्तडिण्डिमः । ब्रह्मविद्यैव उपनिषच्छब्दस्य मुख्योऽर्थ इति सप्रमाणं पूर्वं निरूपितमेव । मोक्षापेक्षिणमुत्तमाधिकारिणं प्रति उपनिषद्वाक्यानि, विशेषतः महावाक्यानि प्रत्यग्ब्रह्मैक्यमेव बोधयन्तीति निश्चप्रचम् ।

"अयमात्मा ब्रह्म" इति महावाक्यं माण्डूक्योपनिषदिश्रूयते । वाक्यमिदं पदत्रयघटितं भवति । पदार्थज्ञानेनैव वाक्यार्थज्ञानं स्वरूपं लभते । महावाक्यानि च अखण्डार्थमेव बोधयन्तीति वेदान्तप्रक्रियासंप्रदाय इति आम्रेडितमेव । माण्डूक्योपनिषदि आदौ ओंकारस्य सर्वव्यापकतां प्रतिपाद्य समस्तोऽपि वाक्प्रपंचः ओंकारेऽन्तर्निहितः ओंकाररूप एव भवतीति पठितम् । तेनच कल्पितस्य सर्वस्यापि नामरूपप्रपंचस्य एकेनैव प्रयत्नेन निवृत्तिं संपाद्य प्रकृतं प्रत्यग्ब्रह्मैक्यं बोधयितुमानुकूल्यं प्रकल्पितम् । यतो हि, नामरूपात्मकः सर्वोऽपि प्रपंचः विकल्पमात्रं न तु वास्तविकंतत्त्वमित्यवगन्तव्यम् । महावाक्ये च अयमिति पदं प्रत्यक्षंवस्तु निर्दिशति । अतः महावाक्ये तात्पर्येण प्रतिपिपादयिषितं ब्रह्म न परोक्षं, किन्तु नित्यापरोक्षं तदिति सिद्ध्यति । ब्रह्मचैतन्यं स्वप्रकाशत्वात् सर्वात्मकत्वाच्च नित्यापरोक्षं विराजते । विश्वतैजसप्राज्ञतुरीयप्रकारैः चतुर्भिःपादैरुपेतः "सोऽयमात्मा चतुष्पात्" इत्यग्रेपठ्यते। आत्मनश्चत्वारः पादाः न गोरिव पादा भवन्ति । रूप्यके पादचतुष्टयमिव केवलं व्यवहारसौकर्यायैवं प्रकल्प्यते । विश्वतैजसप्राज्ञाश्च केवलं प्राप्तिसाधनत्वेन पादा अभिधीयन्ते । तुरीयश्च प्राप्तव्यरूपेण पादः पठ्यते । आद्यत्रये करणव्युत्पत्तिः । तुरीये च कर्मव्युत्पत्तिरिति व्युत्पत्तिभेदोऽवगन्तव्यः कल्पितस्यापि पूर्वत्रयस्य लये

वस्तुसत्यस्तुरीय एव केवलमद्वितीयः स्वयं प्रकाशते । "अयम्" इति निर्देशात् अदृष्टादिवत् ब्रह्म न नित्यपरोक्षमिति निश्चीयते, घटादिवच्च दृश्यवस्तु न भवतीति च । आत्मशब्दश्च प्रत्यगात्मनि प्रसिद्ध इति प्रत्यगात्मानमेव बोधयति । देहेन्द्रिय मनःप्राणाहंकारातिरिक्तं सर्वान्तरं तानि सर्वाण्यपि भासयत् तत्सर्वसाक्षिभूतं प्रत्यक्चैतन्यमेवात्मशब्देनात्र प्रतिपाद्यते । ब्रह्मशब्दश्च सर्वाधिष्ठानभूतं पारमार्थिकं परचैतन्यं प्राधान्येन प्रतिपादयति । दृश्यत्वेन मिथ्याभूतस्य आकाशादिसमस्तप्रपंचस्य बाधपरमावधिभूतं तु परं ब्रह्मैव । तद्ब्रह्म सच्चिदानन्दरूपमद्वितीयं स्वयं विभाति । एवं महावाक्यघटकपदानां अर्थज्ञाने संपादिते पूर्वोक्तवत् ऐक्यप्रक्रियया-स्वयंप्रकाशमानमद्वितीयं प्रत्यगब्रह्मैक्यं अखणडवाक्यार्थत्वेन निश्चीयते । महाद्भुतोऽयमनुभवः । गुरूशिष्ययोरेकानुभवस्य परमप्रतिष्ठा विजृम्भते । ब्रह्मणः किमपि कारणं न भवति । ब्रह्मणश्च किमपि कार्यं नोत्पद्यते । ब्रह्मणि च नान्तर्भेदो नबहिर्भेदः । स्वयंप्रकाशमानं प्रत्यक्चैतन्यमेव अद्वितीयं ब्रह्मचैतन्यं सर्वात्मकं स्वयं विद्योतते । सर्वेषामेव वेदान्तानामिदमेव परमतात्पर्यमितिशम् ।